संस्कृत

प्रयोग

याज्ञिक

क्र. नं. १५२

१०४९

महाचार्यशुद्धिप्रयोग

3313

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1)

श्रीगणेशाय नमः॥ ॐ॥ अथ महार्चाशुद्धिप्रयोगः॥ अथ पिंडिकास्थितानां॥ अथातो देवतानां महोपघातानां विधिं व्याख्यास्यामः॥ तत्र म
होपघाताः श्वचांडालपतितरजस्वलामेध्यसूतकशवसंसर्गेषु प्रासादकरण्यव्यापारैर्लिंगछायंत्यजजातयोपद्दृश्यंते एतानि महोपघातानि ॥ कर्तकेषु २
श्वशब्दः काकाद्युपलक्षकः॥ चांडालपतितशब्दे कवचनांत्यावसायिनः पापिष्ठोपलक्षको॥ अमेध्यशब्दो मस्यस्पृष्टेरिस्तानं प्राप्य तैलदुपलक्ष
कः॥ सुरास्थवसवपिदं प्रकरोमध्यास्योपलक्षकः॥ एवमादिनिमित्तेषु महार्चाशुद्धिं कुर्यात्॥ तद्यथा॥ कर्त्तुः अनुकूले ह्नि यजमानः सुप्रक्षालि॰ प्र ४
आचांतः शुद्धासने प्राङ्मुखः स्वगृह्यस्य गणेश्वरपूजां विधाय महार्चाशुद्धि संकल्पं कुर्यात्॥ पुनः संस्कारकर्त्ता वल्लभ नेमौलिकं फलमिति वच
नात्॥ दशपूर्वान्दशापरांश्च आत्मानां सह एकविंशतिपुरुषानुद्धर्तुकामोऽहं अमुकनाम्निप्रतिमायां लिंगे वा पूर्वोक्तमहोपघातादिजन्य तमोवापू
जाद्यनर्हतानमस्कारादिप्रदक्षिणाअनर्हतादिदोषनिरासार्थं नमस्कारादियोग्यतासिध्यर्थं प्राचीनप्रतिष्ठापकाचार्यैरनुप्रतिष्ठितानां लिंग
प्रतिमासंस्काराणां प्रणवादिषोडशन्यासानां यातयामतादोषनिरासार्थं पुनरुत्तेजनार्थं बोधायनीयमतमाश्रित्य देशकालाद्यनुसार
तः सप्तरात्रं त्रिरात्रं एकरात्रं वा आचार्यब्रह्मसदस्यत्वात्विक्कारा महार्चाशुद्ध्याख्यं कर्म इदानीमहं करिष्ये॥ तदंगं आचार्य ब्रह्म सदस्य
त्वाविद्वरणं च करिष्ये॥ ततः गणपतिपूजनं स्वस्तिवाचनं मातृकापूजनं नांदीश्राद्धं प्रासादनवीकरणे वास्तुशमनं लक्षहोमं यथाशक्ति तिल
होमं च करिष्ये॥ इत्करीत्या विधाय॥ ततः महार्चाशुध्याख्ये कर्मणि ओ आचार्यत्वा वृणे इत्याचार्यं वृत्वा॥ एवं ब्रह्मसदस्य त्वात्विक्वरणादिकृत्वा स
र्वान्प्रार्थयेत्॥ यथा शक्रस्य वागीश आचार्यः सर्वकर्मसु॥ तथा मम यज्ञमाचार्य त्वोस्मिन्यज्ञकर्मणि॥ मं त्रमूर्तिर्भवानाथः संसारा घोषेना
शनः॥ अर्चाशुद्धिविधावस्मिन्कुरु कर्म यथोदितं॥ त्वत्प्रसादादनुष्ठस्य समयं फलमाप्नुयात्॥ संसारभयभीतेन यतएव प्रवर्तितः॥ प्रारब्ध
त्वत्प्रसादेन निर्विघ्नं मे भवात्विति॥ इत्याचार्यं प्रार्थयेत्॥ त्वनोगुरुः पितामाता त्वं प्रभुस्त्वं परायणं॥ त्वत्प्रसादा ब्र विप्रर्षेसर्वन्मे स्यात्मनोग
तं॥ आपद्धमोक्षणार्थाय कुरु कर्म मतंद्रितः॥ सत्विग्भिः सहितः शुक्लैः संयतैः सुसमाहितः॥ आचार्येण च संयुक्तः कुरु कर्म यथोदितं॥ इति स
दस्यं॥ यथा चतुर्मुखो ब्रह्मा शक्रादीनां मखे प्रभुः॥ तथा त्वं मम यज्ञेस्मिन्ब्रह्मत्वेन वृतो ह्यसि॥ इति ब्रह्माणं॥ अथ कृतसंपुटं कृत्वा सर्वान्प्रा
र्थयेत्॥ अस्य यागस्य निष्पत्त्यै भवतोभ्यर्थितामया॥ सुप्रसन्नैश्च कर्तव्यं कर्मेदं विधिपूर्वकं॥ एवमेव वास्तुशमने आचार्यब्रह्मसदस्यवरणं॥

2A1

जय स्वस्तिजः॥ भगवन्सर्वधर्मज्ञ सर्वधर्मभृतांवर॥ विततेमम यज्ञेऽस्मिन्रक्षाविकृत्यंमेमखेभव॥ एवं लक्षहोमेपि वरणक्रमः॥ अयुता
नाचार्यादीन्गंधपुष्पधूपदीपवस्त्राद्याभरणादिभिरभ्यर्च्य मातृकापूजां कुर्यात्॥ तद्यथा॥ अक्षतपुंजोपरि॥ गौरी पद्मा शची मेधा सावि
त्री विजया जया॥ देवसेना स्वधा स्वाहा मातरो लोकमातरः॥ धृतिः पुष्टिस्तथा तुष्टिरात्मनः कुलदेवता॥ ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी
तथा॥ वाराही च तथेंद्राणी चामुंडाः सप्तमातरः॥ षोडशोपचारैः पूजयेत्॥ ततो नांदीश्राद्धं विधाय तैरेव पंचभिर्वृतैर्भिः ब्राह्मणैः सह हा
स्वस्ति वाचनं च कारयेत्॥ तद्यथा॥ अर्चाशुध्यां गेयजमानस्य सर्वदुरितोपशमनार्थं आयुरारोग्यऐश्वर्याभिवृद्ध्यर्थं ब्राह्मणैः सह महा
स्वस्तिवाचनं करिष्ये॥ ॐकारीत्या कुर्यात्॥ ततो दूर्वाक्षतोपेतपल्लवपिहितान् जलपूर्णकलशान्सुवासिनीश्चाग्रतः कृत्वा दुंदुभिशब्देन ब्रह्म
घोषेण देवतायतनं गच्छेत्॥ ततो आचार्यादिभ्यः पवनपानेन भूतशुद्ध्यादिमातृकान्यासः॥ ततः आचार्यसंकल्पः॥ ततो ग्रहातिथ्य कल्पो
न ग्रहातिथ्यं विधाय॥ ततः ताम्रपात्रे गायत्र्या षोडशपलं गोमूत्रं॥ अंगुडाधर्मितं गोमयं गंधद्वारेति॥ आप्यायस्वेति गोमयपाष्टगुणं क्षी
रं॥ दधिक्राव्णो इति पंचगुणं दधि॥ शुक्रमसीत्येकपलमाज्यं॥ देवस्यत्वेति एकपलं कुशोदकं॥ आदाय हस्तेन मालोड्य प्रणवेन यज्ञियस्य का
ष्ठेन निर्मथ्य स्थापयित्वा॥ अद्भ्यः संभृत इत्यनेन नारायणो नभूमिस्तंभतुलादि प्रासादमादौ शुद्धोदकेन प्रक्षाल्य सप्तपत्रैः कुशैः पंचगव्य
मादाय॥ इरावतीदं विष्णुर्मानस्तोकेत्रीनर्द्ग्नीति॥ जितं ते पुंडरीकाक्ष नमस्ते विश्वभावन॥ सुब्रह्मण्य नमस्तेस्तु महापुरुषपूर्वज॥
नृसिंह उग्ररूप ज्वल ज्वल प्रज्वल स्वाहा॥ भूतानि राक्षसा वापि ये त्रात्रतिष्ठंति केचन॥ ते सर्वेप्यपगच्छंतु विष्णोर्पूजां करोम्यहं॥ देवस्य त्वा ◦
सरस्वत्यै वाचोयंतुर्यंत्रेण॰णाभिषिंचामि॥ प्रासादमभ्युक्ष्य॥ अघोरेणास्त्रेण नरसिंहबीजेन दिव्यदृष्ट्या निरीक्ष्य विकि नसिंहगायत्र्या
रान्विकिरेत्॥ सिद्धार्थकान्समादाय कृत्वा चास्त्राभिमंत्रितान्॥ ईशानाभिमुखो भूत्वा विकिरेत्सर्वतो दिशं॥ अपसर्पंतु ये भूता ये भूता भू
मिसंस्थिताः॥ ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया॥ पुनः शुद्धोदकेन क्षालयेत्॥ ततः कर्मांगं नमः शंभवे च मयोभवे च इति आर्यैः स्ना चा
न॥ सहस्राणि सहस्रशो इति द्वादशभिर्मार्जनं उत्तरीयवस्त्रपरिधाय अपआचम्य दुंदुभिशब्देन ब्रह्म[ ]घोषेण प्रासादमुदीच्यां
यत्र प्रस्रवणोदकं तत्र गत्वा नवं मृन्मयं कलशं आकलशेषु धावतीत्यादाय॥ ब्रह्मा देवानां प्रथमः संबभूव॥ विश्वस्य कर्ता भुवनस्य गो

र्तो॥ ब्रह्मविद्यां सर्वविद्याप्रतिष्ठितां॥ अथर्वाय ज्येष्ठपुत्राय प्राह॥ अथर्वणे यां प्रवदेत॥ ब्रह्माभरद्वाजाय सत्याय प्राह। भरद्वाजोंगिरसे प्र
हपरावरां॥ शौनह वै महाशालोंगिरिहसनुउरिहसनुं दुःप्रपन्नप्रनिपत्सा॥ तस्मै मवगतो विज्ञायते। स सर्वविदपि विज्ञातं भवतीति। द्वे विद्ये
वेदितव्ये। इति हस्मयज्जाः॥ ब्रह्मविदो भवंति परा चैवापरा च। तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं नि
रुक्तं छंदो ज्योतिषमिति। अथ परा च यापरा तत्तदक्षरमधिगम्यते॥ यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं नित्यं वि
भुं सर्वगतं च सुसूक्ष्मं यद्भूतयोनिं परिपश्यंति धीराः॥ यथोर्णनाभिः सृजते गृह्णते च॥ यथा सतः पुरुषात्केशलोमानि तथाक्षरात्संभवती
ह विश्वं॥ तपसा चीयते ब्रह्म ततोऽन्नमभिजायते॥ अन्नात्प्राणो मनः सत्यं वा वाकर्म सेवामृतं जरि सर्वज्ञः सर्ववेभुक। ज्ञानमयं तपः॥ तस्मा
देतद्ब्रह्म नाम रूपमन्नं च जायते॥ तदेतत्सत्यं॥ इति दशभिर्मंत्रैः प्रस्रवणोदकेन कलशं पूरयेत्॥ तद्दुंदुभिशब्देनागत्य॥ देवतायै कलशं स्थाप
येत्॥ स्वस्त्ययनं वाचयित्वा दुंदुभिशब्देनार्घ्यमुपस्थापयेत्॥ प्रथमं पंचगव्येन विधिना कृतेन॥ द्वितीयं क्षीरेण॥ तृतीयं दध्ना॥ चतुर्थमाज्येन
पुराणेन॥ पंचमं मधुना॥ षष्ठं शांत्योदकेन॥ एतैर्मंत्रैरर्घ्यमुपस्थापयेत्॥ अग्निरिति भस्म॥ वायुरिति भस्म॥ जलमिति भस्म॥ स्थलमिति भ
स्म॥ सर्वं ह वा इदं भस्म॥ तस्मात्कलतमेतन्नू॥ अधर्मअज्ञानअवैराग्यअनैश्वर्यक्षितिसर्वं पारिप्लावनरूपेण संहारेण निःफलं॥ तस्माद्वा ए
तस्मादात्मन आकाशः संभूतः॥ आकाशाद्वायुः॥ वायोरग्निः॥ अग्नेरापः॥ अद्भ्यः पृथिवी॥ पृथिव्या ओषधयः॥ ओषधीभ्योऽन्नं॥ अन्ना
त्पुरुषः॥ स वा एष पुरुषोऽन्नरसमयः॥ धर्मज्ञानं च वैराग्यमैश्वर्यं सकलाविदः॥ एवं रूपया सृष्ट्या देवं सकलं ध्यात्वा देवतांगेषु तत्त्वानि स
र्वाणि च विन्यसेत्॥ तद्यथा॥ पृथिव्यप्तेजो वाय्वाकाशाः॥ शब्दस्पर्शरूपरसगंधाः स्पर्शाः॥ वाक्पाणिपादपायूपस्थाः॥ त्वक्चक्षुःश्रोत्रजिह्वा
प्राणा मनो बुद्धिरहंकारश्चित्तं आत्मा चेत्येतानि पंचविंशतितत्त्वानि॥ यत्कर्तृत्वं॥ वेदवित्त्वं॥ शांतत्वं॥ दांतत्वं॥ आत्मतत्त्वं॥ तपस्वित्वं॥ अ
धित्वं॥ वशित्वं॥ एतानि देवस्य पादतलमस्तकांतेषु न्यसामि॥ अतऊर्ध्वं देवनाम्नाभिवदंति॥ अमुकदेवोसीति॥ अष्टौ कलशान्प्रति
ष्ठाप्य समुद्रेष्वेष्टसु इति चतुरश्चेन सूक्तेन आकलशेषु धान्नति कलशालिंगे अभिव्ययस्वेति एतान्येतया सेचाष्टौ कलशान्पूर
येत्॥ पूरणमंत्रैरनुमंत्रणं॥ नदीसंगमरज्ज्या वराहहितनया वल्मीकवपया चमस्ति कायाप्रथमं कलशं॥ शांत्योदकेन निकीर्य॥ राज्ञुदा

श्री
॥२॥

नर्मदा चंद्रभागा च शरयूर्गंडकी तथा ॥१०

(२A)

राम्चथार्जुनत्वचाभिरशोकपल्लवा। द्विभिरम्यप्येरन्यैश्चतरुपल्लवैश्च द्वितीयं॥ तृतीयं कुशोदकेन॥ चतुर्थं शांत्युदकेन। पंचमं प्रस्रवणोद
केन॥ षष्ठं गंधोदकेन॥ सप्तमं मिक्षूरसेन॥ अष्टमं पुष्पोदकेन॥ आपो हिष्ठामयोभुव इति तिसृभिः हिरण्यवर्णाः शुचयः पावका इति चतसृ
भिः पवमानः सुवर्जन इति चैतेनानुवाकेन देवतां स्नापयेत्॥ ततः रुद्रं जलाषभेषजं नीलशिखंड कर्मकृत्॥ ऽऽः प्रश्नं दुरहस्यांतो जघेत्या
भिदास्रति॥ यस्य जानं नीलग्रीवो यस्य जानं हरितः॥ कल्माषपुच्छमोषधे जंभयास्य रुधती॥ अपश्यम श्रंतीं नीलग्रीवं विलोहितं॥
उतत्वागोपा अदृशन्नदृशन्नुदहार्यः॥ उतत्वा विश्वाभूतानि तस्मै दृष्टाय ते नमः॥ रुद्रवीरशिखंडनीलकर्मणि कर्मणि॥ नमोभवाय नमः
शर्वाय नमः कुमारशत्रवे। यस्य हरी अश्वतरौ गर्दभावभितस्सरौ॥ तस्मै नीलशिखंडाय नमः सभाप्रपादिने॥ इति नीलरुद्रैः तं पूर्वस्थापि
तं कलशमभिमंत्र्य कलशे तीर्थान्यावाहयेत्॥ तद्यथा॥ काशी कुरुस्थली माया॥ अयोध्या मथुरापुरी॥ शालग्रामसगोकर्णं नर्मदा चैव सरस्वती॥ त्य
तीर्थान्येतानि कुंभेस्मिन् विशंतु ब्रह्मशासनात्॥ व्यूषा सूरदास रोजाक्षी पद्महस्ता शशिप्रिया॥ आगच्छंतु समे श्रेष्ठा गंगा पापप्रणा
शिनी॥ नीलोत्पलदलश्यामा पूज्यहस्ता द्वजेक्षणा॥ आयातु यमुना देवी कूर्मे स्थानेस्थिता च या॥ प्राची सरस्वती पुण्या पयोष्णी गौत
मी तथा॥ जंबूकी च शतद्रुश्च कालिका सुप्रभा तथा॥ वितस्ता चैव पाशा च शर्मदा च पुनः पुनः॥ गोदावरी महावर्त्ता शोण आवर्त मर्जुनी॥
कावेरी कौशिकी चैव तृतीया च महानदी॥ विटका प्रतिकूला च सामनदा चैव विश्रुता॥ करतोया वेत्रवती रेणुका वेणुका च या॥ अत्रे वृगंगा
वैतरणी काश्मीरी ह्रदिनी च या॥ प्लावनी या च सर्वे च कल्माष नासनी तथा॥ वंक्षस्था च अपापा च सिंधुर्वन्यारुणी तथा॥ ताम्रा चैव त्रिप
थगा तथा मंदाकिनी परा॥ चैलकेशी च पारा च दुंदुभी नकुली तथा॥ नीलगंधा च बोधा च पूर्णचंद्रा शोभना॥ अमरेशं प्रभासं च पु
ष्करं नैमिषं तथा॥ आषाढमिंद्रमुंडं च भास्करं च कुलाकुलं॥ हरिश्चंद्रं परं गुह्यं गुह्यं मध्यममीश्वरं॥ श्रीपर्वते समाख्यातं जल्पेश्वरमतः प
रं॥ आम्रातकेश्वरं चैव महाकालं तथैव च॥ केदारं मुत्तमं गुह्यं महाभैरवमेव च॥ गयां चैव कुरुक्षेत्रं गुह्यं कनखलं तथा॥ विमलं चाट्टहास
च माहेंद्रं भीममष्टमं॥ स्वपदं रुद्रकोटिं च अविमुक्तं महालयं॥ गोकर्णं भद्रकर्णं च हेमाक्षस्थानमष्टमं॥ छागलाक्षं द्विरंडं च माकोटं मं ग
लेश्वरं॥ कालंजरं वरं चैव देवदारुवनं तथा॥ कुशांकर्णं तथैव हस्थानेश्वरमतः परं॥ एतानष्टश्चतीर्थानि गुह्यक्षेत्राणि सर्वशः॥ तानि

Rajawade Samshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

महार्चा॥
॥३॥

(3)

सर्वाणि कुंभे स्मिन्या विशंतु ब्रह्मशासनात्॥ एवं कलशे तीर्थानि विन्यस्य पंचगव्यं मंत्रपूतं कृत्वा पुष्कर पर्ण मोदुंबरं शमी बैंकंकत पल्लव
शाप्लक्षं न्यग्रोधरा मुदाला भ्रश्च थार्जुन त्वचः॥ अशोकचंपक चूताश्वत्थ वट पल्लवा न्यानीय श्र्वानस्य त्या संभारा न्यथा लाभ मष्टोत्तर
शतमाहृत्य पार्थिवान्संभारा नृशकरा सिकता वराहविहत वल्मीक वपया मृदं चयोडुपदास सुसृदं॥ स्यात्त दला भे कुल्सी रसु की यदाहर
न्॥ एतान्यं चगव्यादि संभारा नूपं चरत्नैः सह॥ इंद्रो अ राजगतो य ईशे॥ सप्त होता सप्त धानि कुंभे॥ परेण तंतुं परिषि च्यमानं॥ अं त
रादित्ये मनसा चरंतं॥ देवानां हृदयं ब्रह्मान्वविंदत्॥ इति हृदयं मंत्रेण कुंभे निधाय॥ ॐ नमो भगवते वासुदेवायेति द्वादशाक्षर
पाष्टाक्षरेणाष्टाक्षरेण वा गंध पुष्पादि धूप दीपैः कलश मभ्यर्च्य॥ देवा हवै स्वर्गं लोकमायन्नित्य थर्वशिरेणोनि मंत्र्य ततो देवं महते
न वाससा आपादतलम सत्कार्ले संवेष्ट्य आचार्यो सहितो देवस्य मूर्ध्नि शिक्यारोपितकलश धारा नाथ चेदथर्वशीर्षं जपन्
आसप्तरात्रात्यं चरात्रात्रिरात्राद्वा॥ ॥समाप्तिदिने प्रातः विचित्रम हाने वेयं वितस्तं षोडशकुटपपरिमितं धान्यैः कृतविशेषतो
मधुरा न्नं पायसादिच प्रतिमा ग्रेनिधाय अन्नतो जना सानि धार्य आचार्यः प्रतिमायाः पृष्ठतः स्थित्वा वस्त्रं विमोचयेत्॥ दुंदुभि वाद्यान
कृत्वा पुरुहूतमा त्रमवस्थाप्य आचार्य सहितो शांतिजप्य देवं पुरुषसूक्तेन सामिधेनी कल्पेन देवगायत्र्या ज्येष्ठसामभिरनु वीत॥ ततो
आचार्यः समुद्रज्येष्ठाइति चतुर्ऋचेन सूक्तेन प्रतिमां शुद्धोदकेन क्षालयेत्॥ दूर्वाक्षतान्प्रातमायाः शिरसि दत्वा देवं प्रार्थयेत्॥ नम
स्ते चैव सुरेशानि प्रतीते विश्वकर्मणः॥ प्रभो विनाशे षजगद्वाचा लक्ष्म नमो नमः॥ त्वयिसंपूजयामीशा नारायण मेनामयं॥ रहिता शेष
दोषेश्च ऋद्धियुक्ता सदा भवेत्॥ ततः सुवासिन्यः तैलारोपणादि रुक्षेदारोपणा तैलारोपणा मंगलगीतैः सौभाग्य द्रव्यवाणा पूपादि पुरः
सर एवालि पिष्टादि दैवेदी पैरष्टभिः पंचभिर्वा नारी नीराजितं आचार्यः पूजयेत्॥ अन्नात् परिस्तृत इत्यक्षताः॥ पुष्पावतीति पुष्पाणि॥ वस
सरस्याल्पिष्टादि वैदीपैरष्टभि
ते एतावानस्येति स्नानं॥ शाकीन वयजमानस्य इति वस्त्रं॥ सव्या हूति प्रणवगायत्र्याः शुद्धोदकेन स्नानं॥ आचार्यः चतुर्विंश
नस्त्वेति धूपं॥ एतावानस्येति स्नानं॥ ततः अनुमंत्रयेत्॥ अथ देवं स्नापयेत्॥ इदमापः प्रवहत पं नृतं॥ रति प्रथमं कुंभो
तिकलशोनादाय प्रतिष्ठाप्य समुद्रज्येष्ठादिना पूरयेत्॥ अनु मंत्रयेत्॥ अथ देवं स्नापयेत्॥ इदमापः प्रवहत पं नृतं॥ रति प्रथम कुंभो
तिकलशो नादाय प्रतिष्ठाप्य समुद्रज्येष्ठादिना पूरयेत्॥ उपा तं क्या यदेवानां पर्ण वल्क सुतंशुधत॥ रति द्वितीयेन॥ इमं मे गंगे इति तृतीय कुंभेन
दकेन॥ आपो देवी शुभ्रा स्वेमापा आपिसुधर्ता॥

श्री
॥३॥

(3A)

नत्वा यामीति त्वि तुर्थेन मृत्तिकामय पल्लकुंभोदकेन ॥ अग्निमूर्द्धेति पंचमेन ॥ समुद्रज्येष्ठा इति शुद्धोदककलशेन ॥ गंधद्वारामिति सप्तपल सं
गन्धोदकेन ॥ वरुणस्योत्तंभनमसि वरुणस्य स्कंभसर्जनमसि ॥ उत्पत्सो वरुणस्य पाशः ॥ इति शुद्धोदककलशेन । तत्सवितुरिति द्वादशपल
गोमूत्रोदकेन । आपो हि ष्ठेति शुद्धोदककलशेन ॥ प्रसद्य भस्मना योनिमपश्च पृथिवीमग्ने ॥ संसृज्य मातृभिष्ट्वं ज्योतिष्मान्पुनरासदः ॥
इति सुष्टसंमित भस्मोदककलशेन ॥ यो वः शिवतमो रस इति शुद्धोदककलशेन ॥ दधिक्राव्णो इति विंशतिपल उदधिकुंभोदकेन ॥ पयः पृ
थिव्यामिति त्रिपलामितं पंचगव्यकुंभेन ॥ देवी रापो अपांनपादिति शुद्धोदकेन ॥ आप्यायस्वेति षोडशपल क्षीरकुंभोदकेन । अस्मा
समधि आप्यते इति शुद्धोदकेन ॥ दधिक्राव्ण इति त्रिपल कुंभेन । पुनानः प्रथममिति मिश्रशुद्धोदकेन ॥ घृतवतीमध्वर्यो इति सप्तपल कुंभोद
केन ॥ देवस्य त्वेति शुद्धोदकेन ॥ मधुवाता इति त्रिपल मधुकुंभेन ॥ आपो अस्मानिति शुद्धोदकेन ॥ आयं गौरिति त्रिपल शर्कराकुंभेन ॥ आ
पो हयन्महतीरिति शुद्धोदक प्रक्षालनं ॥ यज्ञायज्ञा वो अग्नय इति पंचकषायकुंभेन ॥ सूक्ष्मतंतुवस्त्रेण संमार्ज्य सुगंधतैलेनाभ्यंज्य ॥ द्रुपदा
दिवेन्मुमुचानः ॥ इति यवगोधूमशालिबिल्वमसूरमुद्गचूर्णेन मुखमुद्धर्त्य ॥ या ते रुद्रेति सुगंधतैलेनामलकेन गृहीत्वा देवस्य शिरसि द
त्वा ॥ मा नस्तोके प्रतद्विष्णुरिति चतुष्पलोदकेन कलशद्वयेन स्नापयेत् ॥ अपामसोमेति पंचामृतेन ॥ अयं राजा वरुणोनुमन्यतामिति सो
त्रेण मंत्रेण ॥ तत्सवितुरिति ॥ संतपयामसीति ॥ आप्यायस्व समेतु ते ॥ अस्य न सधिष्ठेति पंचभिर्मंत्रैः शुद्धोदककलशैः क्षालयेत् ॥ गंधद्वा
रामिति गंधोदकेन ॥ यज्ञायज्ञा वो इति पंचकषायकुंभेन ॥ या जाता ओषधय इति औषधिकलशेन ॥ ओषधयः प्रतिमोदध्वमश्वावतीः सोमापू
पलः ॥ अयं वो गर्भ ऋत्वियः प्रत्नं सधस्थमासदमिति पुष्पशतकुंभोदकेन ॥ याः फलिनीरिति अष्टफलोदककुंभेन ॥ हिरण्यवर्णा इति सुव
र्णोदककुंभेन ॥ ॐ हविष्मतीरिमा आपो ० सुम्नेमाधत्तेति श्रृंगोदकेन ॥ धान्यमसीति धान्योदकेन ॥ विरूपाक्षमाधिबाधे तमाधिबाधतमा
धिबाधतां ॥ जनयित्र्यै त्वा पुत्रमाहुः सनः कर्माणि साधयेति सहस्रधारकलशेन ॥ इमं मे गंगे इति सर्वतीर्थावाहितकलशोदकेन ॥ यादिष्ठास्ति
सर्वौषधिकलशेन ॥ नमोस्तु सर्पेभ्य इति नागचंपकपल्लवोदकेन ॥ अश्वे वः अश्वत्थ कुंभ ० यायाणि इति रत्नोदककुंभेन ॥ आस्य दोहे न साल्मि
वल्मीकमृज्जलेन ॥ पृथिवी देवयजनीति होमभस्म जलकुंभेन ॥ उद्धृतासि वराहेणेति सूकरमृज्जलेन ॥ अलभे शानमिति सरोजमृज्जलेन ॥

(८)

समुद्रसंज्ञां तेषां कृत्वा स्नापयेत्॥ कयानश्चित्रेति क्षारोदकेन॥ आपोहिष्ठेति क्षीरोदकेन॥ दधिक्राव्ण इति दध्योदकेन॥ घृतवतीति घृतोदकेन॥ पयः पृथिव्यामिति पयोदकेन॥ इक्षुरसेन च॥ देवं बर्हिः स्वस्त्रीमाजुषाणो रुपृथिव्यामिति सुरोदकेन॥ स्वादिष्ठयेति स्वादूदकेन॥ सरस्वतीयोन्यां मृत्राजेति गर्भोदकेन॥ पुनर्दशभिः कलशैः लोकपालाभिधैः पल्लवान्वितैः स्नापयेत्॥ त्रातारमिंद्रमिति कदंबपल्लवोदकेन॥ त्वं नो अग्नइति शाल्मलीपल्लवकुंभेन॥ सुगन्नः पंथामिति जंबूपल्लवकुंभेन॥ असन्वंतमिति अशोकपल्लवकुंभेन॥ तत्वायामीति प्लक्षपल्लवकुंभेन॥ आनोनियुद्भिरिति चूतपल्लवकुंभेन॥ वयं सोमेति वटपल्लवकुंभेन॥ तमीशानमिति पिंपलपल्लवकुंभेन॥ नमोअस्तु सर्पेभ्य इति नागपल्लवकुंभेन॥ ब्रह्मजज्ञानमिति पलाशपल्लवकुंभेन॥ त्र्यंबकमिति रुद्राक्षकलशोदकेन॥ पुनः पंचभिर्मंत्रैर्गंधोदककलशैः स्नापयेत्॥ नमः शंभवे च मयोभवे च॥ हंसः शुचिषत्॥ या ते रुद्र शिवा तनूः॥ विष्णो रराटमसि॥ ब्रह्मजज्ञानं॥ ततो भेरीशंखतूर्यध्वनिभिः पुण्यस्त्रीमंगलोद्गीतैः ब्रह्मघोषैः षोडशभिरष्टाभिरेकेन वा मंगलकुंभेन गंधोदकेन देवं स्नापयेत्॥ एवं कृत्स्नं शुद्धं कृत्वा देवलिंगमंत्रैः विविधैः सम्यगर्च्य किम्तश्चक्षुरित्याद्यैः सकलीकृत्य अर्चाभिमानिनीं देवतामावाहयेत्॥ एह्येहि भगवन्विष्णो लोकानुग्रहकारक॥ यज्ञभागं गृहाणेमं वासुदेव नमोस्तु ते॥ अथ देवं सितवस्त्रेण सुगंधतैलेन परिमृज्य आचार्यः देवताया हतैर्वस्त्रैः परिधाप्य गंधैर्विविधैरभ्यर्च्य धूपैः सुधूप्य अष्टौ पिष्टिकामृदीपान् प्रज्वाल्य एतस्मिन्काले चक्षुषी ज्योतिष्मती कुर्यात्॥ चित्रं देवानामिति हिरण्यपात्रे हिरण्यशलाकया अकृयादः नाम धेनाः अक्षिणी अनक्ति॥ हिरण्यगर्भः समवर्तताग्र इति॥ ॥ततः परिचर्याविधानेन षोडशोपचारैः पूजा कार्या॥ ततः वास्तुविधानेन प्रासादवास्तूपशमनं कार्यं॥ लक्षहोमे तु वसुशास्त्रमार्गेण वसोर्धारा कर्तव्या॥ महास्नपनं कृत्वा पूर्वस्थापितकलशैः यजमानस्याभिषेकः कार्यः॥ प्रत्यहं एककालं वा अग्निवापितमन्नं दीनानाथांश्च तोषयित्वा॥ ततः आचार्यादीन् गंधपुष्पधूपदीपवस्त्राभरणानि भूषणाच्छादनानि यथाविभवं सम्यगर्चयित्वा वित्तशाठ्यं वर्जनदक्षिणां तेभ्यो दद्यात्॥ यथा संतुष्टा भवेयुरिति तेभ्यो आशिषो गृहीत्वा बंधुजनैः सह भुंजीत॥ एवं कृते इह जन्मनि जन्मांतरे च सार्वकालं चिरंतनकल्याणोपभोगावाप्तिर्महाभ्युदयं नमानंदस्तनोति बोधायनो केशवादिति॥ ॥इति सर्वदेवतोपयोगी महाचलशुद्धिप्रयोगः समाप्तः॥

५ ॥इदं पुस्तकं शाके १६६९ प्रभव नाम संवत्सरे ज्येष्ठ कृष्ण २ जोगळेकरोपनाम कर्घुनाथात्मजगणेश शास्त्रियेदं पुस्तकं॥ ८७॥ ॥८॥

कु
श्री
॥८॥

यंसमस्येत् ॥ पर्वप्रातर्होमांतोश्च प्रातःन्रोषेहोमांत्समस्येत् ॥ सर्वथापर्वसायंहोमः प्रतिपत्प्रातर्होमश्च पृथगेवहोतव्यो
अत्रपूर्ववदग्निमभिरक्षेत् ॥ अंतरापत्न्यग्निर्नष्टोतुतदारभ्यपूर्ववत्सायंप्रातर्होमान्यथाकालंकुर्यात् ॥ ॥ अथसंभा
र्यस्यप्रवासेप्रसक्तेग्निसमारोपविधिः ॥ ॥ कालहोमानंतरं अयंतेयोनिरृत्वियइत्यस्यगाथिपुत्रोग्निरनुष्टुप् ॥
अग्निसमारोपणेविनि॰ ॥ ॐ अयंते

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(5)

सामग्री
१ कुंकुमाक्षता
१ पूजासाहित्य
१ पुण्याहवाचनसाहित्य
१ मधुपर्कसाहित्य
१ प्रवेशकलस अलंकृत
१ लक्षहोमास [illegible]आदि
१ ग्रहहोमास ग्रहसमिधा
१ पंचगव्य
१ सर्षप
१ [illegible]
१ प्रस्रवणोदककलश
१ कलश १००
१ मधु
१ साखर
५ त्वचा
१ अर्जुनत्वकू १ वट
१ उदुंबर १ अश्वत्थ
१ राजुदार

८ मृत्तिकास्थले
१ संगम
१ डोह
१ वारूळ
१ क्षेत्र
१ वराहविहत
१ वल्मीक
१ संगम
१ शर्करा

२ पल्लव
अशोक
शमी
पनस
वड
चंपक
कदंब
केतकी
पाइर
साबरी
राजुदार
नागचंपक
जांबूळ

५ पंचपल्लव
१ अष्टगंधे
१ इक्षुरस
१ कमळपत्र
१ सुगंधतैल
१ उष्णोदक
१ आच्छादनभ
१ धिष्ठासनवस्त्र
१ विचित्रान्ननैवेद्यप्रस्थ ४
१ हरिद्रादिपष्ट
१ पैष्टिकदीप
१० सर्वौषधी
कुष्ठ • जटामांसी
हळद • आंबेहळद
दूर्वा • कृष्णागरु
चेरुंड • कचोरा
नागरमोथे • शतावरी
१ फळे नानाविध
१ सुवर्णशकलें

१ गजश्रृंग
५ पंचरत्ने
सोने
लसणया
नीळ
हिरा
मोती
१ रुद्राक्ष
४ १ देवासपरिधानवस्त्रें
५ उदके
सुरोदक
गर्भोदक
स्वादूदक
रत्नोदक
क्षारोदक
१ कलशास धान्ये
१ आचार्यास वस्त्रे
५ पिष्टें उद्वर्तनास . मसूरपिष्ट
यव • साळी • गहूं
बिल्व • आमलकं

१ पंचामृत
५ नारळ
४ खोबरे वाट्या
१ शुक्लवस्त्र देवास
१ सुपारी २००
१ पाने २००
१ खारीक ४०
१ [illegible] दक्षणा
१ सुवर्णशलाका २

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com